# COOCH BEHAR PANCHANAN BARMA UNIVERSITY

B.A. Honours Part-I Examinations, 2017

## SANSKRIT-HONOURS

## PAPER-SANH-I

Time Allotted: 4 Hours | Full Marks: 100

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

### Unit - I

1. संस्कृतभाषया <u>एकस्योत्तरं</u> प्रदेयम् (देवनागरीलिप्यां लेखनीयम्) $12\times1=12$

(क) 'किरातार्जुनीयम्'– इति महाकाव्यस्य प्रथमसर्गे वर्णितं वनेचरवचनम् आलोचनीयम्।

(ख) 'भारवेरर्थगौरवम्'– इति पाठ्यांशमाश्रित्य सोदाहरणम् आलोचनीयम्।

2. अधोलिखितयोः कस्यापि <u>एकस्य</u> बङ्गभाषया आङ्गलभाषया वा अनुवादः कार्यः। $5\times1=5$

(क) कृतारिषड्वर्गजयेन मानवीमगम्यरूपां पदवीं प्रपित्सुना।
विभज्य नक्तन्दिवमस्ततन्द्रिणा वितन्यते तेन नयेन पौरुषम्॥

(ख) क्रियासु युक्तैर्नृपचारचक्षुषो न वञ्चनीयाः प्रभवोऽनुजीविभिः।
अतः अर्हसि क्षन्तुमसाधु साधु वा हितं मनोहारि च दुर्लभं वचः॥

अथवा

द्वयोः संस्कृतभाषयोत्तरं प्रदेयम् – 2.5×2 = 5

(क) 'किरातार्जुनीयम्' इति काव्यस्य प्रसिद्धटीकाया नाम किम् ? कश्च प्रणेता ?

(ख) युधिष्ठिरेण कथं नियुक्तः वनेचरः स च कुत्र समाययौ ?

(ग) कीदृशं भूपतीनां चरितं, कीदृशं वा जन्तूनाम् ?

3. संस्कृतभाषया देवनागरीलिप्या च एकस्य व्याख्या कार्या – 8×1 = 8

(क) कृतप्रणामस्य महीं महीभुजे जितां सपत्नेन निवेदयिष्यतः।
न विव्यथे तस्य मनो न हि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणः॥

(ख) निरत्ययं साम न दानवर्जितं न भूरिदानं विरहस्य सत्क्रियाम्।
प्रवर्तते तस्य विशेषशालिनी गुणानुरोधेन विना न सत्क्रिया॥

## Unit - II

4. (क) अधोलिखितेषु पारिभाषिकशब्देषु द्वयोः ससूत्रं संज्ञानिर्णयः कार्यः। 3×2 = 6
प्रातिपदिकम्, धातुः, अनुनासिकः, गुणः, प्रगृह्यः।

(ख) प्रत्याहाराः चत्वारः निर्मीयताम्। 1×4 = 4
वल्; इण्; अच्; अट्; झश्; हल्।

(ग) सोदाहरणं द्वयोः व्याख्या कार्या – 3×2 = 6

(i) उपदेशेऽजनुनासिक इत्।

(ii) अनुदात्तङित्तः आत्मनेपदम्।

(iii) परः सन्निकर्षः संहिता।

(iv) अर्थवदधातुरप्रत्ययः प्रातिपदिकम्।

(v) तुल्यास्यप्रयत्नं सवर्णम्।

(vi) स्वरितञितः कर्त्रभिप्राये क्रियाफले।

(vii) अतोदीर्घो यञि।

(घ) चतुर्णां वाच्यपरिवर्तनं विधेयम् – 2×4 = 8

(i) बालकाः पुस्तकं पठन्ति।

(ii) राजा प्रजाः पालयति।

(iii) अहं गच्छामि।

(iv) शिशवः चन्द्रं पश्यन्ति।

(v) सीता वनं गतवती।

(vi) क्रीडन्ति बालकाः क्षेत्रे।

(vii) स गच्छति।

(viii) भवति।

(ङ) द्वयोः ससूत्रं पदसाधनं क्रियताम् – 4×2 = 8

रामाः; रामाणाम्; हरिः; रमाः; ज्ञाने; रमया।

(च) अधोलिखितेषु द्वयोः ससूत्रं पदसाधनं क्रियताम् – 4×2 = 8

पठामि, पठिष्यति, पठेयुः, सेवते; सेविष्यन्ते।

## Unit - III

5. "स्वप्नवासवदत्तस्य दाहकोऽभून्न पावकः"– 12×1 = 12

इति उक्तेर्याथार्थ्यं विचारणीयम्।

अथवा

वासवदत्तायाः चरित्रं चित्रणीयम्।

6. संस्कृतभाषया देवनागरीलिप्या च एकस्य व्याख्या करणीया – 8×1 = 8

(क) पद्मावती बहुमता मम यद्यपि रूपशीलमाधुर्यैः वासवदत्ताबद्धं न तु तावन्मे मनो हरति।

(ख) कः कं शक्तो रक्षितुं मृत्युकाले

रज्जुच्छेदे के घटं धारयन्ति ?

एवं लोकस्तुल्यधर्मो वनानां

काले काले छिद्यते रुह्यते च ॥



FORMAT 12 Wilum

7. मातृभाषया आङ्गलभाषया वा <u>एकस्य</u> अनुवादः कार्यः। 5×1 = 5

(क) परिहरतु भवान् नृपापवादं न
पुरुषमाश्रमवासिषु प्रयोज्यम्।
नगरपरिभवान् विमोक्तुमेते
वनमधिगम्य मनस्विनो वसन्ति॥

(ख) ऋज्वायतां च विरलां च नतोन्नतां च
सप्तर्षिवंशकुटिलां च निवर्त्तनेषु।
निर्मुल्यमनभुजगोदरनिर्मलस्य
सीमामिवाम्बरतलस्य विभज्यमानाम्॥

अथवा

संस्कृतभाषया <u>द्वयोः</u> उत्तरं प्रदेयम् – 2.5×2 = 5

(क) को वसन्तकः ? तस्य कः सम्बन्धः उदयनेन साकम् ?

(ख) उदयनस्य वीणायाः नाम किम् ? कस्मात् तेन सा प्राप्ता ?

(ग) क आसीद् यौगन्धरायणः ?

## Unit - IV

8. देवनागरीलिप्याश्रित्य सरलसुरगिरा कस्यचिद् **द्वयस्य** अनुवादः साधनीयः – 5×2 = 10

(a) A teacher can never teach unless he is still learning himself. A lamp can never light another lamp unless it continues to burn its own flame. Man lives to learn.

(b) The Meghaduta is perhaps the most well known and widely read work of Kalidasa. It is a small poem. A certain Yaksa cursed by his master Kuber lives in Ramagiri away from his wife.

(c) Sanskrit is a very old language but it can be used in modern era also. Sanskrit is the most scientific language for computer.



FORMAT 12 W/turn

# COOCH BEHAR PANCHANAN BARMA UNIVERSITY

B.A. Honours Part-I Examinations, 2017

## SANSKRIT-HONOURS

## PAPER-SANH-II

Time Allotted: 4 Hours | Full Marks: 100

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

### Unit - I

1. 'वाणोच्छिष्टं जगत् सर्वम्'– इति वचनस्य याथार्थ्यं प्रतिपाद्यताम्। 12×1 = 12

अथवा

कादम्बर्याः कथामुखमाश्रित्य चण्डालकन्यायाः चरित्रचित्रणं विधेयम्।

2. अधोलिखितयोः अनुच्छेदयोः कस्यापि <u>एकस्य</u> मातृभाषया आङ्गलभाषया वा अनुवादः कार्यः। 5×1 = 5

(क) यश्च मनसि धर्मेण, कोपे यमेन, प्रसादे धनदेन, प्रतापे वह्निना, भुजे भुवा, दृशि श्रिया, वाचि सरस्वत्या, मुखे शशिना, बले मरुता, प्रज्ञायां सुरगुरुणा, रुपे मनसिजेन, तेजसि सवित्रा च वसत सर्वदेवमयस्य प्रकटितविश्वरुपाकृतेरनुकरोति भगवतो नारायणस्य।

(ख) यस्य च परलोकाद् भयमन्तःपुरिकालकेषु भङ्गः नूपुरेषु मुखरता विवाहेषु करपीडनमनवरतमखाग्निधूमेनास्रुपातः तुरगेषु कशाभिघातो मकरध्वजे चापध्वनिरभूत्।

3. सन्धिविच्छेदं कृत्वा पुनः देवनागरीलिप्यां लिख्यताम्। 3×1 = 3

अतिवयसमग्रजन्मानमखिलमन्त्रिमण्डले प्रधानममात्यं कुमारपालितनामानमब्रवीत्।

## Unit - II

4. अभिज्ञानशकुन्तले हंसपदिकागीतस्य माहात्म्यं प्रतिपाद्यताम्। 12×1 = 12

अथवा

'उपमा कालिदासस्य' इति वचनस्य याथार्थ्यम् अभिज्ञानशकुन्तलमाधारीकृत्य विविच्यताम्।

5. सरलसंस्कृतभाषया कस्यचिदेकस्य श्लोकस्य व्याख्या विधेया। (देवनागरीलिप्यां लेखनीयम्) 8×1 = 8

(क) इदं किलाव्याजमनोहरं वपुस्तपःक्षमं साधयितुं च इच्छति।
ध्रुवं स नीलोत्पलपत्रधारया शमीलतां छेत्तुमृषिर्व्यवस्यति॥

(ख) भवन्ति नम्रास्तरवः फलागमैर्नवाम्बुभिर्दूरविलम्बिनो घनाः।
अनुद्धताः सत्पुरुषाः समृद्धिभिः स्वभाव एवैष परोपकारिणाम्॥

6. कस्यापि एकस्य श्लोकस्य पादपूरणं देवनागरी लिप्यां क्रियताम् – 5×1 = 5

(क) मुक्तेषु रश्मिषु निरायतपूर्वकाया
______________।
______________
______________॥

(ख) सरसिजमनुविद्धं शैवलेनापि रम्यं
______________।
______________
______________॥

7. अधोलिखितेषु श्लोकेषु द्वयोः मातृभाषया आङ्गलभाषया वा अनुवादः कार्यः। 5×2 = 10

(क) शमप्रधानेषु तपोधनेषु गूढं हि दाहात्मकमस्ति तेजः।
स्पर्शानुकूला इव सूर्यकान्तास्तदन्यतेजोऽभिभवाद् वमन्ति॥

(ख) कः पौरवे वसुमतीं शासति शासितरि दुर्विनीतानाम्।
अयमाचरत्यविनयं मुग्धासु तपस्विकन्यासु॥

(ग) ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्तदृष्टिः पश्चार्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम्।
दर्भैरर्द्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा पश्योदग्रप्लुतत्वाद् वियति बहुतरं स्तोकमुर्व्यां प्रयाति॥

8. अधोलिखितेषु प्रश्नेषु द्वयोः उत्तरं प्रदेयम्। 2.5×2 = 5

(क) करभकः क आसीत् ? स किं निवेदयामास दुष्यन्ताय ?

(ख) अभिज्ञानशकुन्तलस्य नान्दीश्लोकः देवनागरीलिप्या लिख्यताम्।

(ग) 'कृत्ययोर्भिन्नदेशत्वात् द्वैधीभवति मे मनः' – केन कथमुक्तमेतद्वचः ?

(घ) पतिगृहगमनावसरे शकुन्तलां प्रति कण्वस्य के तावदुपदेशा आसन् ?

## Unit - III

9. (क) अधोलिखितेषु छन्दःसु द्वयोः संज्ञां प्रदाय सोदाहरणमालोच्यताम्। (संस्कृतभाषया)– 5×2 = 10
मन्दाक्रान्ता, वसन्ततिलकम्, शार्दूलविक्रीडितम्, उपेन्द्रवज्रा।

(ख) अधोलिखितेषु एकस्य श्लोकपादस्य गणविश्लेषणपूर्वकं छन्दोनिर्णयं कृत्वा संज्ञा प्रदेया – 5×1 = 5

(i) पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या।

(ii) राधिका दधिविलोडनस्थिता।

(iii) यदालोके सूक्ष्मं व्रजति सहसा तद्विपुलताम्।

2.5×2 = 5

10. (क) पद्यं किम् ? तच्च कतिविधम् ? सोदाहरणं व्याख्यायताम्।

(ख) छन्दोमञ्जरीदिशा गुरुस्वरमाश्रित्य लघुटिप्पणी लेख्या।

## Unit - IV

7.5×2 = 15

11. अधोलिखितेषु प्रश्नेषु द्वयोरुत्तरं प्रदेयम्।

(क) नाटकप्रकरणयोः भेदः सोदाहरणमुपस्थाप्यताम्।

(ख) अर्थप्रकृतिः का नाम ? कतिविधा सा ? भेदद्वयं सोदाहरणं व्याख्येयम्।

(ग) सन्धिः कः ? कतिविधः सः ? तत्र भेदद्वयमाश्रित्य लघुनिबन्धो विरचनीयः।

5×1 = 5

12. अधोलिखितेषु कमप्येकमाश्रित्य टिप्पणी लेखनीया।

प्रकरी, विष्कम्भकः, पताका, अभिनयः।